# M.A. 1st Semester Examination, 2023

## SANSKRIT

PAPER – SAN-102

*Full Marks* : 50

*Time* : 2 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

**सर्वे** प्रश्ना: संस्कृतेन नागर्या च समाधेया:

1. प्रश्नद्वयं समाधेयम्— 10×2

(क) को नाम प्रत्याहार: ? सोदाहरणमालोच्य प्रत्याहारेषु इतां ग्रहणं भवति न वेति सयुक्ति आलोच्यताम् ।

(ख) 'स्थानेऽन्तरतम:' इति सूत्रं व्याख्याम् 'यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीय:' इति आलोच्यताम् ।

(ग) 'स्थानिवदादेशोऽनल्विधौ' इति सूत्रं सोदाहरणं व्याख्याय 'अनेनेह स्थानिवद्भावेनाच्त्वमाश्रित्य 'अनचि' इति द्वित्वनिषेधो न शङ्कयः' इत्यस्य भावः स्पष्टीक्रियताम् ।

(घ) प्रातिपदिकत्वं ससूत्रं सोदाहरणमुपवर्ण्यताम् ।

**2.** व्याख्या कार्या त्रयाणाम्— $5 \times 3$

(क) मुखनासिकावचनोऽनुनासिकः ।

(ख) तुल्यास्यप्रयत्नं सवर्णम् ।

(ग) आद्यन्तौ टकितौ ।

(घ) ईदूदेद्द्विवचनं प्रगृह्यम् ।

(ङ) ङ्याप्प्रातिपदिकात् ।

**3.** ससूत्रं संसाध्यताम्— $2\frac{1}{2} \times 2$

(क) कृष्णार्धिः *अथवा* गव्यूतिः ।

(ख) रामेषु *अथवा* सर्वे ।

**[ Internal Assessment — 10 Marks ]**

# M.A. 1st Semester Examination, 2023

## SANSKRIT

PAPER – SAN-103

*Full Marks* : 50

*Time* : 2 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

**सर्वे** प्रश्नाः संस्कृतेन देवनागर्या च समाधेयाः

**1.** प्रश्नद्वयं समाधेयम्— 10×2

(क) ब्रह्मणः सृष्ट्यपेक्षया कविसृष्टेः औत्कर्षं काव्यप्रकाशदिशा प्रतिपाद्यताम् ।

*अथवा*

वाचकशब्दस्वरूपं *मम्मटोक्तरीत्या* आलोच्यताम् ।

(*ख*) सभेदं सलक्षणं सोदाहरणम् अनुप्रासः व्याख्यायताम् ।

*अथवा*

उपमालंकारः सविस्तरं सभेदं सोदाहरणम् आलोच्यताम् ।

**2.** प्रश्नत्रयं समाधेयम्— 5 × 3

(*क*) व्याख्यायताम्— इति हेतुस्तदुद्भवे ।

(*ख*) तात्पर्यार्थोऽपि केषुचित्— सप्रसङ्गमालोच्यताम् ।

(*ग*) सोदाहरणं व्याख्यायताम्- यमकम् अथवा ससन्देहः ।

(*घ*) रूपकोत्प्रेक्षयोः पार्थक्यं निरूपयत ।

(*ङ*) सयुक्तिकमलंकारनिर्णयः क्रियताम्—

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ।।

**3.** एकस्य व्याख्या कार्या— 5 × 1

(*क*) जग्राह पाठ्मृग्वेदात् सामभ्यो गीतमेव च ।
यजुर्वेदादभिनयान् रसानाथर्वणादपि ।।

(ख) दु:खार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम् ।
विश्रामजननं लोके नाट्यमेतद् भविष्यति ।।

**[ Internal Assessment — 10 Marks ]**

---